दिनाङ्कः- 28.05.2024
प्रातः- 06:55

लोकसभानिर्वाचनम्

लोकसभानिर्वाचनस्य सप्तमान्तिमचरणाय च प्रचाराभियानं तीव्रतया प्रचलति। राजनीतिकदलानां शीर्षनेतार: जनसभा: मार्गप्रदर्शनं च कुर्वन्ति। अस्मिन् चरणे जूनमासस्य प्रथमे दिनांके अष्टराज्यानां सप्तपञ्चाशदासनेभ्य: मतदानं भविष्यति। मतगणना जूनमासे चतुर्थे दिवसे भविष्यति। बिहारराज्ये पटनासाहिब-संसदीय क्षेत्रस्य खुसरूपुर-क्षेत्रे कांग्रेसनेता राहुलगांधी प्रोक्तवान् यत् एनडीए इति प्रशासनं द्विकोटि-युवभ्य: वृत्यवसरस्य प्रदानस्य वचनं न पूरितवत्। असौ कथितवान् यत् प्रधानमन्त्री एतदर्थं उत्तरं निज-प्रतिवेदनपत्रे कथयतु। श्रीगांधी पाटलिपुत्र-आरा-संसदीयक्षेत्रान्तर्गतं पालीगंज-आरा-जनपदयोः नैर्वाचनिक-जनसभां समबोधयत्। लोकसभा-निर्वाचनस्य सप्तमे चरणे जूनमासस्य प्रथमे दिनांके एतेषु क्षेत्रेषु निर्वाचनं भविष्यति। राजदनेता तेजस्वी-प्रसाद-यादव: जहानाबाद-लोकसभाक्षेत्रस्य घोसी-क्षेत्रे आक्षिप्तवान् यत् भारतीय-जनता-पार्टीति दलं संविधानस्यावसानं वाञ्छति। भाजपेतिदलस्य वरिष्ठनेता मध्यप्रदेशस्य मुख्यमन्त्री डॉ. मोहनयादव: पाटलिपुत्र संसदीय-क्षेत्रात् भाजपा-प्रत्याशिन: समर्थने मनेर-स्थले जनसभा: विहितवान्। ओडिसाराज्ये बीजेडी प्रमुख: मुख्यमन्त्री च नवीनपटनायक: केन्द्रपारा-लोकसभा-क्षेत्रस्य बरूआ क्षेत्रे जनसमागमं सम्बोधितवान्। प्रधानमन्त्री अथ च भारतीयजनतापार्टीति दलस्य वरिष्ठनेता नरेन्द्रमोदी अद्य कोलकातां नगरं यास्यति। तत्रासौ बारासात-जादवपुर-उत्तर-कोलकाता संसदीय क्षेत्रस्य दलप्रत्याशिनः समर्थनाय गच्छति। असौ मध्याह्ने बारासात-लोकसभा-क्षेत्रे जनसमागम् सम्बोधयिष्यति। तदनन्तरं जादवपुरेऽपि जनसभां सम्बोधयिष्यति।

प्रधानमन्त्री-साक्षात्कार:

प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत् आत्मनिर्भर-लक्ष्यान्तर्गतं स्वदैशिकप्रतिभासंवर्धनं वृत्यवसर-क्षमतानां च संवर्धनमिति उद्देश्यं वर्तते। एकस्मिन् वार्ता-अभिकरणे स्वीय-साक्षात्कारे श्रीमोदी उक्तवान् यत् प्रत्यक्ष-लाभार्थि-हस्तांतरणस्य माध्यमेन जनेभ्य: अष्टत्रिंशत्-लक्ष-रूप्यकाणि आवण्टितानि। प्रधानमन्त्री सबलं प्रत्यपादयत् यत् प्रशासनस्य प्रत्येकस्मिन् निर्णयकेन्द्रे राष्ट्रप्रधानं एव भवति।

दिल्ली-मुख्यमन्त्री

दिल्ल्या: मुख्यमन्त्रिणा आम-आदमी-पार्टीति दलस्य राष्ट्रिय-संयोजकेण अरविन्दकेजरीवालेन स्वास्थ्यनिरीक्षणाय स्वीय-अल्पावधिक-मुक्ति-याचिकां सप्तदिनानि यावत् संवर्धयितुं सर्वोच्चन्यायालये याचिका प्रस्तुता। अत्रावधौ प्रवर्तन-निदेशालयेन गतसप्ताहे दिल्ल्या: एकस्मिन् न्यायालये श्रीकेजरीवालस्य अल्पावधिक-याचिकायाः समाप्तेरनन्तरं न्यायिक-निगडनं चतुर्दश-दिनानि यावत् संवर्धयितुं याचिका प्रख्यापिता।

भारतर्तु-विज्ञानम्-सम्भावना

भारतर्तु-विज्ञान-विभागेन पूर्वानुमानितः यत् अस्मिन् वर्षे प्रावृट्-ऋतोः अवधौ सम्पूर्णे देशे सामान्यवृष्टिः भविष्यति। ऋतु-विज्ञान-विभागस्य महानिदेशकः डॉ. मृत्युञ्जय-महापात्रः दक्षिण-पश्चिम-प्रावृट्-ऋतोः दीर्घकालिक -पूर्वानुमानस्य द्वितीयचरणं प्रख्यापयन् एतां वार्तां कथितवान्। आगमिषु चतुर्षु दिवसेषु केरल-उत्तरपूर्वीय -राज्येषु प्रावृष्टेः समारम्भाय स्थितिः अनूकुला वर्तते।

पापुआन्यू-गिनी

पापुआ -न्यू -गिनी-देशे शुक्रवासरे भूस्खलनात् कारणात् भूयोऽपि द्विसहस्रं जनाः मृत्युं उपगताः। राष्ट्रीय-आपत्केन्द्रेण संयुक्तराष्ट्राय लिखिते पत्रे सूचनेयं प्रदत्ता। विदेशमन्त्री डॉ. एस. जयशंकरः एतां दुर्घटनां प्रति कष्टम् अनुभूतवान् उक्तवान् च यत् तत्रस्थस्य प्रशासन-जनैः सह भारतस्य संवेदनाः वर्तन्ते। भारतं अस्मिन् संकटयुते समये स्वीय-मित्र-देशैः सह विद्यते।

॥ इति वार्ता:॥